लोकप्रियसाहित्यग्रन्थमाला -४२

गजेन्द्रशङ्कर-पण्ड्या-विरचितं

# विषमपरिणयम्



नीना भावनगरी

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# अनुक्रमः


| | |
|---|---|
| पुरोवाक् | iii |
| सम्पादकीय | v |
| अनुक्रम | vi |
| प्रस्तावना | vii |


## विषयपरिणयम्


| | |
|---|---|
| पात्रसूची | २ |
| प्रथमोऽङ्कः | ३ |
| द्वितीयोऽङ्कः | १२ |
| तृतीयोऽङ्कः | २० |
| चतुर्थोऽङ्कः | ३० |
| पंचमोऽङ्कः | ५० |
| पद्यसूची | ६१ |

# अनुक्रमः

पुरोवाक् iii
सम्पादकीय v
अनुक्रम vi
प्रस्तावना vii

## विषयपरिणयम्

पात्रसूची २

प्रथमोऽङ्कः ३
द्वितीयोऽङ्कः १२
तृतीयोऽङ्कः २०
चतुर्थोऽङ्कः ३०
पंचमोऽङ्कः ५०

पद्यसूची ६१

शीतः श्वेतकरः कृतान्तविततो देहं खलु स्पृष्टवान्
जीर्णं सर्वमनेन किन्तु हृदयं जीर्णं कथं नो कृतम् ।।१०।।

**सुन्दरदासः**- आनय सत्वरं शशकवदेनाम् । अथवा हस्तपादौ संयम्य मुखं च कर्पटपूर्णं कृत्वा विकृष ।

(जयदासस्तथा कर्तुं प्रयतते । लावण्यवती चावधीरयते ।)

**जयदासः**- दुर्विनीते ! विनयं प्रतिपद्यस्व ।

**लावण्यवती**- प्राणमोक्षं वरं मन्ये न तु वृद्धहस्तग्रहणम् ।

**जयदासः**- तर्हि त्वरितमनुभव पितृमातुलकोपप्रसादम् ।

(ताडयति बद्धुं च प्रवर्तते ।)

**लावण्यवती**- (समाक्रोशन्ती) त्रायताम् त्रायताम् यदीदृशस्य परिणयस्य विरोधी कलियुगेऽस्मिन्नथवाऽबलाजनस्य दुःखेन समदुःखः श्रुणोति माम् ।

**सुन्दरदासः**- एवमेव समाकृष द्रुततरम् ।

**लावण्यवती**- (पुनः प्रलपति ।)

(नेपथ्ये)

**शान्तिदासः**- तिष्ठ ! तिष्ठ ! रे मूढ ! कथमुन्मत्तो दुर्गज इव कमलनालिकां निष्पीडयितुं प्रवृत्तः ।

**सुन्दरदासः**- (समाकर्ण्य चकितः) क एष विनीतवेशोऽत्रैवाभिवर्तते ।

**शान्तिदासः**- (प्रविश्य) किमनया पिशाचवृत्त्या ।

(जयदासहस्ताल्लावण्यवतीं मोचयति,
जयदासस्तु पुनरेनां गृह्णाति ।)

पिशाचादुद्भूतिस्तव मतिरभूद्वा यमकृतौ
किमुद्वृत्त्या लब्धं जडहृदयमाखेटकजनात् ।
गवादिभ्यो दत्तस्तव हृदयभावोऽत्र विधिना
कृता वा येनैते सदयहृदयास्त्वं च विगुणः ।।११।।

मुञ्च मुञ्चैनामथवा वज्रमुष्टिर्मे विगतसंज्ञं त्वां पातयिष्यति ।

(लावण्यवतीं मोचयति ।)

किमिदमननुरूपं न्यस्तमत्रेत्यतर्काः
स्थिरशुचिरसनाग्राश्चित्रभावं भजन्ते ॥६॥

अपि च

काश्चित्कन्या वलितवदनाः किञ्चिदानम्र मुख्यः
काश्चित्कान्ता मथितमदनाः किञ्चिदाकुञ्चिताक्ष्यः।
काश्चित्प्रौढाः सुनतनयनाः किञ्चिदुन्मीलिताक्ष्यः
जातोद्वेगास्तव कुचरितैस्त्वामतस्तर्जयन्ते ॥७॥

अपरं च

काश्चिन्नार्यः सुमधुरतया कोकिलाः स्मारयन्त्यो
रक्तोष्ठाभ्यां जलकमलजं रागमुन्मीलयन्त्यः।
गातुं गीतं मुदितमनसा यावदेताः प्रवृत्ताः
तावद्दृष्ट्वा विपथगतिकां भग्नकण्ठाः स्थितास्त्वाम् ॥८॥

**लावण्यवती-** मा मैवम्। यथा मामुद्दिश्य भवानेतच्छ्लोकत्रयमुद्गिरति तथा भवन्तमनुलक्ष्याहमपि तथैव वच्मि। मम तु तावदेतदन्यत्कथनीयं वर्तते।

अग्निः प्रज्वलितः पुनः पुनरसौ संधूयमानेन्धनो
नाभेश्चालितवायुपूरितमुखाद्विप्रेण संभावितः।
साक्षाद्भावगतोदयेरित इमां दुर्भागिनीं मानयन्
शैत्यं याति पुनः पुनः प्रकुपितः शीतेन ते कर्मणा ॥९॥

**सुन्दरदासः-** जयदास ! न ते पौरुषं विद्यते यथा त्वमप्यसंबद्धप्रलापिन्या ईदृशसंभाषणे दत्तकर्णस्तिष्ठसि। आकृष बलादेनामत्र।

**देवीदासः-** श्वशुरवर्य ! सुकोमललता कशाप्रहारेणाभिहता मार्दवं त्यजति। हताङ्गी च विरूपा भवति। यथाऽस्याः शरीरसौष्ठवं सौन्दर्यं चाहते स्यातां तथा शनैः शनैरानयैनाम्।

**लावण्यवती-** अहो ! वृद्धशृगालस्य हरिण्यां दयाभावः।

देहो जर्जरितस्तथैव नयने श्वेतास्त्वचो मूर्धजाः
क्षीणा वाग्वदतो मुखं रसनया लालाभृतं दृश्यते।

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली